वा १३ केतत्र परमो यत्नः कृमिविट्भस्मरूपके कर्तव्यः परमो यत्नः पातकस्य विनाशने १४
त्वनेकजन्मसंजातं पापं यद्विविधं भवेत् यदा भवति मानुष्यं नाशनीयं तदैव तत् १५ मा
नुष्यादुद्धरेति स्वे यदा प्राणी विगाधिप तस्मरेत्पूर्वजन्मानि कर्मजां च मतिः सदा १६ गर्भवासा
द्विनिर्मुक्त आशानादिभिरावृतः न पश्यति खगश्रेष्ठ वालत्वादि समाश्रितः १७ प्राप्य मानुष्य
भावं च सुखं दुःखं च विंदति प्राकृतैः कर्मपापैश्च मृत्युमाप्नोति मानवः १८ आधानात्तेंच वर्ष
स्त्विस्वल्पपापैर्म्रियेत सः पंचवर्षाधिको मूत्वा महापापैर्म्रियेत सः १९ तार्क्ष्य दानप्रभावेन जी
वेत्तं तु चिरं भुवि गरुड उवाच मृता गर्भे तु ये जीवाः ये प्राकृचौलकृते मृताः २० कृताचौल १८

मृतापेच्यतेषां किंचिन्न भवेद्रज श्रीकृष्ण उवाच यदि गर्भो विपद्येत स्रवेद्वापि योषितस्तदा २१
यावन्मासस्थितो गर्भस्तावद्दिवससूतकम् न तस्य किंचित्कर्तव्यमात्मनः श्रेयमिच्छति २२
जंतुर्यो नो विपद्येत प्राक्चौलकरणाद्यदि दुग्धं देयं च बालेभ्यः कृतचौले दहेन्नरम् २३ पं
चवर्षाणि दातव्यं बालेभ्यो भोजनं तथा मासजातस्य देयं च अन्नसंबंधको यतः २४ जात
हि ५ स्य ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च यत्नः कार्यः खगश्रेष्ठ जंतुमसुक्षयेयतः २५ त
स्य प्रोच्यते देयमन्नपानि ईदृशे कुले स्वाप्नाउनिष्टो नो भूत्वा रति भुक्त्वादि वर्जितः २६
पुनर्जन्म व्रजेज्जंतुस्तस्माद्देयं मृते शिशौ पुराणे गीयते गाथा शृणु त्वं हि खगेश्वर २७
भोज्यं भोजनशक्तिश्च रतिशक्तिर्वरस्त्रियः विभवो दानशक्तिश्च नाल्पस्य तपसः फ
लम् २८ दानाद्भोगानवाप्नोति सुखं तीर्थस्य सेवनात् सुभाषणान्मृतो लोको विद्वान्
स्याधर्मवित्तया २९ अदत्तदानस्तु भवेद्दरिद्रो दरिद्रभावात्कृपिनोति पापम् पाप
प्रभावान्नरकं प्रयाति पुनर्दरिद्रः पुनरेव पापी ३० इति श्रीगरुडपुराणे प्रेतकल्पे

प्रेक॰ १८ गर्भबालविपत्तिनीमपंचदशोऽध्यायः १५ श्रीहरिरुवाच पूर्णेतुपंचमेवर्षेऽप्र
मानेवप्रतिष्ठितः चक्षुराहीनिरूपाणीनांचनिरोपम् १ एकादशाद्वादशाहविधिही
नंतथास्वग माहाहानविहीनंचकुमारेकूमसमाचरेत् २ शिखाहीचमृतेनाक्षंदया त
चभोजनं वस्त्रंभुजिंघहे भूमौक्षेपणंबाले द्विवर्षेतुदहेन्मृते ३ शिशुरादंतजननात्सचूडं
बालउच्यते मौजीबंधनात्पूर्वंकुमारःकथ्यतेमया ४ मौज्यभावाच्चशूद्राद्धिः
सप्तमासःशिशुःस्मृतः ऊनवर्षद्वयेबालःकुमारःपंचवत्सरः ५ पौगंडोनववर्षी
स्यात्किशोरःषोडशाब्दिकः अतऊर्ध्वंयुवाज्ञेयोमानवोविनतासुत ६ यद्यप्यल्प
स्तोपजीवंस्याज्जीवतःप्राणिनःपुरा देयंततन्मृतेतस्मिन्निष्फलंविनतासुत ७
यूत्तबीजोभवात्पुत्रा देवर्षिपितृवल्लभाः नैवतेयमदूतेभ्युपीड्यंतेविनतासुत ८
परित्यज्यशरीरंस्वंजीर्णत्वचमिवोरगाः अंगुष्ठमात्रःपुरुषोवायुरूपोऽभ्रमेदु
ष्टाम् ९ तस्माद्दयानिदानानिम्रियतेबालेतुनिष्फलानि तम् जन्मतःपंचवर्षाणि १८

क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः उच्छिन्नो गत्वसते पुनः ॥

आमान्नं १ व्रतबंधानंतरं ३ ॥सो पवित्रो भवेत्सुतः॥ पिंडदो

मुंडनेदत्तमसंस्कृतम् १० पंच वर्षाधिके बाले विपत्तिर्यदि जायते वृषोत्सर्गादिकं कुर्यात्सपिंडीकरणं विना ११ यदि न क्रियते तर्हि प्रेतभावं स गच्छति वत्तार्वाग्देषु देयं स्यात्ततः पितृगणेषु च १२ स्वाहाकारेरतः कुर्याद्द्वेकोदिष्टं षोडश वत्तार्वा कुच तिलैः शुल्कैः मजुद मैश्च सव्यतः १३ सद्गतिं याति तेनैव चिरायुः सत्कुले वसेत् सर्वसौख्यः प्रहृः पुत्रः पित्रोः प्रीतिविवर्द्धनः १४ आत्मा वै जायते पुत्र इति ज्ञेयं खगेश्वर एकः सूर्यो विधुश्चैक आकाशं चैककस्तथा १५ जलसंभृतकुंभेषु प्रतिबिंबेन संचरेत् आत्मा तथैव सर्वेषु पुत्रेषु विचेसदा १६ भवेत्पितुः स्वभावोपः शुक्रशोणितसंगमे तस्मात्स्वभावयोगात्सुः पुत्रास्तत्कर्मकारिणः १७ पितृरूपः सदा कोपि पुत्रो नो जायते खग पितृतः कोपि रूपी स्याद्गुणवान्दानवांस्तथा १८ कः कस्य शब्दश्लोके न भूतो न भविष्यति अंधाद्दधो न भवति मूकान्मूको न जायते १९ बधिराद्बधिरो न स्याद्विद्वान्वा विदोषो नहि गरुड उवाच क्षेत्रजातादिभिः पुत्रैः आद्धं कार्यं कथं प्रभो २० प्रापयंति कां कां प्राप्नुवंति च कां गतिं श्रीभगवानुवाच औरसस्य मुखं दृष्ट्वा मुच्यते पैकादणात् २१ तिगः १

औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः क्षेत्रजः क्षेत्रजातस्तु सगोत्रे गूढजस्तु सुतः दत्ता माता पिता वा यं स पुत्रो दत्तको भवेत् ॥

षां पूर्वाभावे परः परः इति

कुर्वीत पार्वणं श्राद्धं मोरसो विधिवत्तथा कुर्वंत्य
न्ये खगश्राद्धमेकोद्दिष्टं सुतानव ५

प्रे० २० सेत्रजप्रमुखाः पुत्राः मुक्तिमात्रप्रदायकाः तषां मध्ये हि ज्येष्ठस्य अधिकारो क्रियाविधौ २२
यदि ज्येष्ठोपि तं शवं अन्तरितुं चात्मनो ऋणम् मुक्तिं तार्स्यमदीपं चषडरासां शरणुयात्सुधीः
२३ पौराणिकं समाहूय विद्यावलसमन्वितम् पूजयेद्द्रव्यवस्त्रैश्च श्रुत्वा कुर्याद्यथोदि
तम् २४ विनास्य श्रावणे पुत्रः कथं त्रास्यति सत्क्रियां नास्तिकापकृतघ्नापलोभग्रस्ता
परांमिके २५ अविश्वासापधूर्तापनैनतकुसं प्रकाशयेत् कुर्वंति पार्वणश्राद्धमेकोद्दि
ष्टं सुतानव २६ कुर्वंत्यन्ये खगश्राद्धमेकोद्दिष्टं सुतानव पौत्रस्य दर्शनाज्जंतुर्मुच्यतेच
ऋणात्रयात् २७ यः प्रपौत्रमुखं पश्येद्दानं चंद्रार्कं वसेद्दिवि ब्रह्मलोकपुत्रऊर्ध्वं च संग
हीनस्त्वधानयेत् २८ श्राद्धं संवत्सरं कुर्वन् पार्वणं विनतासुत सर्वदानानि संदद्याद्
न्नदानं विशेषतः २९ संगहीतः सुतः पित्रोरेकोद्दिष्टे नवार्षिकम् प्रकुर्वन्नैव लिंगपा पे३
र्वणं कुरुते सचेत् ३० आत्मानं च पितृंश्चैव प्रापयेद्यमयातनाम् संगहीतास्त्वयेके
च्चिद्दासीपुत्रादयस्तथा ३१ तीर्थे श्राद्धं प्रकुर्वंति ह्यामान्नं दहनेचते संगहीनो सुतःमृ २०

त्यापाकेन श्राद्धमाचरेत् २२ सातव्यंतद्यथाश्राद्धं यथाशूद्रान्नभुग्द्विजः ब्राह्मण्यां
ब्राह्मणाज्जाताश्चांडालादधमः स्मृतः २३ यस्तु प्रव्रजिताज्जातो ब्राह्मण्यां शूद्रवच्च सः
द्वावेतौ विधिचांडालौ जातो यश्च स्वगोत्रजः २४ सर्वतो हीनजातौ वा समुत्पाद्य सुतान्स्वग
तैः सुवृत्तैः सुखं यातिर्वैनैनर्कं व्रजेत् २५ कलिकलुषविमुक्तः पूजितः सिद्धसंघैः र
मरचमरमाला वीज्यमानोऽप्सरोभिः पितृशतमपि बंधून्पुत्रपौत्रादिमुक्तानपि न
रकविमग्नानुद्धरेदेक एव २६ इति श्रीगरुडपुराणे प्रेतकल्पे ऽत्यनिर्णयो नामषो
डशोऽध्यायः १६ गरुड उवाच मृतानां प्राणिनां [illegible] कृष्ण कथं कुर्यात्सपिंडनम् कु
त्र यांति सपिंडत्वे कुत्र यांत्य सपिंडने १ कार्यं सपिंडनं केन सह कार्यं च केन तत् सपिं
डीकरणं केन स्त्रिया भर्तरि जीवति २ भर्तृलोकं कथं याति योषित्स्वर्गे सुरेश्वर षोडा
दिकं कथं देयं सपिंडीकरणे कृते ३ पतिपत्न्योः सदैकत्वे प्राप्नुतः कथमुत्तमं श्रीहरिरु

प्रे०२१ दाव पूर्णे संवत्सरे तार्ह्ये कुर्यान्पिंडप्रवेशनम् ४ सपिंडीकरणे प्रेतः कृते याति परां गतिं
प्रेतनाम च संत्यज्य वसेत्पितृगणैः सह ५ सपिंडनं विना कुर्यात्स्वगोत्रं विहितानि च वि-
वाहादि न कुर्वीत मृते च गृहमेधिनि ६ भिक्षुभिक्षां न गृह्णाति यावत्कुर्यात्सपिंडनम्
स्वगोत्रेऽशुचिता तावद्यावत्पिंडान्नमेलयेत् ७ आनंत्यात्कुलधर्माणां प्राणिनां चायुषः
क्षयात् अस्थिरत्वाच्च देहस्य द्वादशाहे प्रशस्यते ८ द्वादशाहे त्रिपक्षे वा षण्मासे वत्सरे
ऽथवा सपिंडीकरणं तार्ह्ये विहितं पितृभिस्त्रिभिः ९ सपिंडीकरणादूर्ध्वं देयं मृततिदि-
नं विना पित्रे पितामहाय प्रपितामहकाय च १० एकोदिष्टविधिं पौत्रैः पितामहसुखेत्र
ये तद्दिने तद्दिने कुर्याद्दशकः पावणं चरेत् ११ अज्ञानादिनमासानां पावणं शुभमिष्यते ॥
अनुत्पन्नशरीरस्य न स्नानं पितृभिः सह १२ ब्राह्मादिविवाहेषु संस्कृता या वधूर्भवेत् भ-
र्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया १३ असुरादिविवाहेन व्यूढा या कन्यका भवे-
त् पितृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रिया १४ पितुः पुत्रेण कर्तव्यं सपिंडीकर २१

तं पुत्रमाप्नुयाद्दीनं तु. ग्निपीडितं तना १ ष्ठेत्ले हेयगमनं तदालानमसमाचरेत् १ कुकुमांजनसद्वस्त्रभूषणैर्भूषितं तु तो नंदयादिद्विजा
तिभ्यो बंधुवर्गेभ्य एव च तत्र स्तूपं नमस्कृत्य परिक्रम्य चितां तदा पुष्पशय्यां तदारोहेन्निजाकेसापपे पतिं सती भूः श्रीफलं दद्या त
दहमाज्ञापयेत्ततः गंगास्नानसमं ज्ञात्वा शरीरपरिदाह पेत् विमानेन तु सूर्यसंकाशे क्रीडते रमणोऽसौ यावदादित्यचंद्रौ च भर्तृलोके चिरं वसेत्

णं खग पुत्राभावे तु पत्न्येव पत्न्यभावे सहोदरः १५ भ्रातावाभ्रातृपुत्रो वा सपिंडः शिष्य एव च
ऋत्विक्पुरोहितो वाथ प्रकुर्वीत सपिंडनम् १६ भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भवेत्
सर्वे तेनैव पुत्रेण पुत्रिणः स्युः खगेश्वर १७ कृतचूडोऽकृतब्रह्मसूत्रश्चाप्यूढः पितुर्ध्वरेत्
उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसौ १८ भर्त्रादिभिस्त्रिभिर्नार्याः श्वश्र्वाभिर्वा सपिंडनम्
एकोद्दिष्टं न कुर्वीत सपिंडीकरणेऽकृते १९ एकोद्दिष्टस्य कर्ता यः पितृहा सोऽभिजायते आत्म
नं च खगश्रेष्ठ तं स नयेन्नरकं चिरं २० सपिंडनेऽकृते यस्मादेकोद्दिष्टं विगर्हितम् एको
द्दिष्टे कृते तस्मात्पुनः कुर्यात्सपिंडनं २१ वर्षं यावत्क्रियाः प्रोक्ताः प्राणिनां खग तत्समये एको
द्दिष्टेन ताः कार्याः नामगोत्रेण धीमता २२ घटादिभोजनं नित्यं दीपदानानि यानि च सपिंडी
करणेऽवृत्ते प्येकस्यैव प्रयच्छति २३ वर्षवृत्तिं च सकलां प्रदहीत स्ववशाक्तितः तेन दिव्यवि
मानस्थो दिव्यदेहो दिवं व्रजेत् २४ तातेजीवति पुत्रस्य सापिंड्यस्यास्ति नामहेः पतिश्वश्र्वा
दिभिर्नार्याः श्व[illegible]श्चापमौ च जीवति २५ पात्यौम्नते वियोगाग्निं च तुर्थीहि पतिव्रता न

द्वितीयादिदशाहपर्यंतं १

सम नः साम्यपादिवसे तेन सह अग्निं विशेत् स्वामिन स्वामिन्

१

प्रे० २२ स्याभुर्तृदिंकार्ये वादशाहं विंदुधः २६ पुत्रिका पितृगोत्रांस्यां स्तुरस्तां सुंचजन्मनः पुत्रोस्मेतनेस्तु
पश्चात्सा पतिगोत्रा भवेत्खग २७ पतेकार्यं भवेत्तस्या योग्निपत्नी मृते विशेते श्राद्धं कुर्या
त्पृथक् तस्याः सपाहम्मृतवासरे २८ अपुत्रौ चेन्मृतौस्यातामेकचिन्मांसमेहनि पृथक् श्राद्धा
निकुर्वीत पिंडान्नघान्पृथक्पृथक् २९ एकादशाहे यत्कर्म पृथक् श्राद्धानि षोडश घटादि प
दहातानि महादानानि यानि च ३० वर्षे यावत्पृथक् कुर्यात्तेन न तृप्तिर्भवेत्तयोः एकगोत्रे मृता
स्तूनां नारीणां मथवान्तणाम् ३१ एकं तु स्थंडिलं कुर्याद्धोमं कुर्यात्पृथक्पृथक् एकादशे
न्हि कुर्वीत पृथक् पिंडांश्च भोजनं ३२ स्त्रीभर्त्रोरेकपाकेन परेषां नखगेश्वर अन्येषामेक
रु पाकेन श्राद्धानि कुर्यात्पृथक् ३३ एकं तु विकरं कुर्यात्पिंडान्दद्यात्पृथक्स्वपि तीर्थे चापरक्षेत्रे च चं
द्रसूर्यग्रहे तथा ३४ नारी भर्तारमासाद्य स्वकं देहं दहेद्यदि तदा वन्हिर्दहेद्देहमात्मानं न च
पीडयेत् ३५ दहेत्संधम्यमानानां धातूनां च यथा मलम् तथा नार्या दहेद्देहहुताशो ह्यमृ
तोपमः ३६ प्रतप्ततैललोहाभ्यां शुद्धिं दिव्यं करोति यः तथैव तैललोहस्य वन्हिनापीड्यते २२

नसः ३७ तथा सा पति संयुक्तापीऽस्मते नैव वह्निना आम्नातस्य मृते पत्योपया चेत्कल्यमेति पति
३८ यस्तु त्यक्त्वा पतिं त्यज्य पापान्मत्र म्रियते गता पतिलोकं न सा पाति यावच्चन्द्रार्कतारकाः ३९ ल
क्ष्मी सुता त्यक्त्वा पितरं मातरं तथा मृतं पतिमनुव्रज्य पत्या सह वसेद्दिवि ४० दिव्यानां
सा तु वर्षाणि सार्द्धकोटित्रयं खग तदन्तेऽवतरेद्भूमौ भोगिनां धनिनां कुले ४१ महाप्रीति
य सा स्त्रीणां पत्या सह पतिव्रता एवं न कुरुते नारी व्यभिचारपरा सती ४२ अन्यजन्मस्य दु
खार्ता दुःशीलाऽप्रियवादिनी वल्गुनी गृहगोधा स्यागोधा ह्यहि मुखी च सा ४३ तस्मात्सर्व
प्रयत्नेन स्वपतिं वसते सदा कर्मणा मनसा वाचा जीवेच्च मृतऽक्षमा भवेत् ४४ मृते जीवति वा प
त्यौ पातकं कुरुते तु या पतिरेति तद्धर्मं सा दुर्भाग्या स्याद्भवे भवे ४५ यद्देवानोपमितृणां च कुर्यान्न
त्वा भर्त्राभ्यर्चनं याति थीनाम् तस्याप्यर्द्धं सर्वदानान्यचिन्ता नारी मुंक्ते भर्तृशुश्रूषया वै ४६
द्वादशाहे कृतं यद्य तावत्सपिंडनम् तत्काले पुनः कुर्याद्दूर्जयित्वो न मासिकं ४७ कृत
तस्याकरणे तार्क्ष्य कृतं पूर्वं विनश्यति मृते कर्मणि तेन न तस्य स्यात्फलमक्षयम् ४८ अ
र्वाक् वर्द्धिनं तातनूज सपिंडतां चेत्प्रकरोति पुत्रः तथापि पिंडं प्रतिमासमेकं कुंभं तथान्नं

प्रे० २३ सजलंचददघात् ४८ इतिश्रीगरुडपुराणेप्रेतकल्पेसपिंडनकथनोनामसप्तदशोऽध्यायः १७
गरुडउवाच प्रेताःकीदृशरूपाःस्युःप्रेतत्वंचभवेत्कुतः प्रेतत्वान्मुच्यतेकेनपुनर्वदद्यकेश
व १ श्रीभगवानुवाच पुरात्रेतायुगेतार्क्ष्यराजासीद्बभ्रुवाहनः महोदयपुरेरम्येधर्मनिष्ठो
महाबलः २ यज्वादानपरःश्रीमान्ब्रह्मण्यःसाधुसंमतः शीलाचारगुणोपेतोदयादा
क्षिण्यसंयुतः ३ प्रजाःपालयतेनित्यंपुत्रान्निवमहामतिः सकदाचिन्महाबाहुर्मृगयां
गंतुमुद्यतः ४ वनंचिवेशगहनंनानावृक्षसमन्वितम् शार्दूलसिंहसंयुक्तंनानापक्षिस
मन्वितम् ५ वनमध्येतदाराजामृगंदूरादपश्यत तेनविद्धोमृगोगाढंवाणेनासुदृढेनच
६ सहितस्तेनवाणेनवनेशोऽदर्शनंययौ राजातच्छोणितस्रावचिन्हेनानुजगाममृगम् ७
ततोमृगप्रसंगेनवनमन्यद्विवेशसः क्षुत्क्षीणगात्रोराजाश्रमसंतापमूर्छितः ८ जल
स्थानेसमासाद्यसाश्वैएवव्यगाहत पीत्वातदुदकंशीतंपद्मगंधादिवासितम् ९ ततो
निःसृत्यसलिलाद्विमलाद्बभ्रुवाहनः न्यग्रोधवृक्षमासाद्यशीतच्छायंमनोहरम् १०
महाविटपिनंनानापक्षिसंघानसंकुलम् वनस्यतस्यसर्वस्यकेतुभूतइवस्थितम् ११तं २३

महातनुमासाघनिषसादमहीपतिः ततः प्रेतं ददर्शी सो क्षुत्तृषाव्याकुलेंद्रियं: १२ उत्कचं मलिनं क्षुद्रं
निर्मांसंभीमदर्शनं स्नायुबद्धास्थिचरणं धावमानमितस्ततः १३ अन्यैश्च विविधैः प्रेतैः सम
तामरिवारितं तं दृष्ट्वा विकृतं हीनं विस्मयं प्राप भूपतिः १४ प्रेतः पापोंतं दृष्ट्वा अटवीमागतं नृप
म् सुसंतुष्टमनाभूत्वा तस्यांतिकमुपापयौ १५ अब्रवीत्सो तदा तार्क्ष्य प्रेतराजो नृपं प्रति प्रेतभा
वमहं त्यक्त्वा प्राप्तोस्मि परमां गतिम् १६ त्वत्संयोगान्महाबाहो जातो धन्यतरोस्म्यहम् महीपतिस्त्व
च कथं त्वं प्रेततां प्राप्तः सर्वमेव वदतत्वतः १७ इति पृष्टः स वै राजा उवाच सकलं स्वयम् प्रेतराजो
वाच कथयामि नृपश्रेष्ठ सर्वमेवादितस्तव १८ प्रेतत्वकारणं श्रुत्वा कृपां कार्यामपि त्वया वैदि
शंनाम नगरं सर्वसंपत्समन्वितम् १९ नानाजनपदाकीर्णं नानारत्नसमन्वितम् नानापुराय देशवासिनः ८
समायुक्तं नानावृक्षसमन्वितम् २० तत्राहं न्यवसन् राजन् देवार्चनरतः सदा वैश्यपातिसदे
वोहं नाम्ना जगति विश्रुतः २१ हव्येन तर्पिता देवाः कव्येन पितरस्तथा विविधैर्भोजनैर्द्वि
नैविप्राः संतर्पितास्तथा २२ मावौवाश्च विवाहाश्च बहवः कारिता मया तत्सर्वं निष्फलं
जातं दैवयोगान्मम प्रभो २३ पुत्रादिर्नास्ति मे कोपि यः कुर्यादौर्ध्वदेहिकम् प्रेतत्वं सुस्थिरं

प्रे०२४ तस्मात्त्वमद्य जेतं नृपोत्तम २४ इति ज्ञात्वा महाराज प्रेतत्वादुद्धरस्व माम् वर्णाश्रमाणां सर्वेषां राजा
बंधुरिहोच्यते २५ तन्मामुद्धर राजेंद्र मणिरत्नं ददामि ते कुरुष्व स्य ममापि त्वं सर्वमेचौर्ध्वदै
हिकम् २६ महीपतिरुवाच केन स्युः कर्मणा प्रेताः प्रेतत्व दद मे खिलम् प्रेतराज उवाच ॥
देवद्रव्यं द्विजद्रव्यं नारीबालधनं तथा २७ ये हरंति नृपश्रेष्ठ प्रेतयोनिं भजंति ते तापसीं च स्व
स्रां च अगम्यां च भजंति ये २८ हेमप्रवालकमलवज्रवस्त्रं हरंति ये कृतघ्ना नास्तिका रौद्राः
साहसेन मता श्च ये २९ हताः पराङ्मुखाः युद्धे प्रेताः स्युः स्ते परि पि च राजोवाच कथं मुक्ताः भवं
ये ते त्वं च न दद मे स्वयं ३० मयौर्ध्वदैहिकं कार्यं कथं ते मे पि सर्वशः प्रेतराजोवाच श्रृणु
राजेंद्र संक्षेपान्नारायणबलिं विधिं ३१ सुवर्णद्वयमाहृत्य शुभां मूर्तिं प्रकल्पयेत् नारा
यणस्य देवस्य सर्वाभरणभूषितम् ३२ स्नापयित्वा शुभैः तोयैः रधिवास्य जपेच्चुतान्
पूर्वेतु श्रीधरं देवं दक्षिणे मधुसूदनम् ३३ पश्चिमे वामनं देवं मुत्तरे च गदाधरम् ॥
मध्ये पितामहं चैव शंभुं स्थापयेत् जपेच्चुतान् ३४ ततः प्रदक्षिणीकृत्य वन्हौ संतर्प्य तान् सु २४
रान् घृतेन दध्ना दुग्धेन विश्वेदेवाश्च तर्पयेत् ३५ ततः स्नातो विनीता सायतमानः

तस्यपुण्यप्रदानेनप्रेतोमुक्तोदिवंययौ श्राद्धेनपरदत्तेनगतःप्रेतोपिसद्गतिं किंपुनःपुत्रदत्तेनपि मापानोः
चाद्भुतम् इतिहासमिमंपुण्यंशृणोतिश्रावयेच्चयः नतौप्रेतत्वमायातःपापचारयुतावपि ९

समाहितः नारायणायविधिवत्सर्वांक्रियामौर्ध्वदैहिकीम् ३६ आरभेतमदक्रोधकामलो
भविवर्जितः कृत्वाश्राद्धानिसर्वाणिवृषोत्सर्गविधिंतथा ३७ त्रयोदशानांविप्राणांपददा
प्रे० ३ निददतेसुतः शय्यांदद्यात्तथासान्नांकुंभान्दद्याच्चसोदकान् ३८ नारायणेतिमध्यस्थंस्व
कंनामसमुच्चरन् एवंकरोतियोमर्त्यःशुभंतस्यफलंभवेत् ३९ एवंसंजल्पतिप्रेतेराज
सेनासमागमा अदृश्योभूत्ततःप्रेतोराजापिस्वपुरंययौ ४० चकारविधिवत्सर्वंप्रेतो
क्तंचौर्ध्वदैहिकं संतप्तकांचनमयंकलशंविधायदिग्पालध्यातशिवकेशवमूर्तियुक्तं
४१ स्वीराज्यपूरविवरंप्रणिपत्यमर्त्यो दद्याद्द्विजायस्वगदानशतैःकिमन्यैः इतिश्रीगरु
डपुराणेप्रेतकल्पेप्रेतसंवादेनामअष्टादशोऽध्यायः १८ गरुड उवाच क्षितौक्षिपेत्कुतो
जंतुंपंचरत्नंकुतोमुखे कुतोवास्तांस्तिलान्दर्भानातुरस्यविनिक्षिपेत् १ किमर्थंमंडलंभूमौ
क्रियतेगोमयेनच किमर्थमातुरोदानंददातिद्विजपुंगवे २ किमर्थंतिलदानंचवस्तुसामादिक
विभो विप्रेभ्यंदत्तंकुतोपापान्नाशुलसाःसन्निधिंकुतः ३ गोदानंचकुतःकुर्यात्कुतश्चनवसन्निधिम्

दाहंनकुर्वतः ४

प्रे० २५ प्रायश्चित्तं कुतः कुर्याद्विधिना केन तच्चरेत् ४ लवणं दीयते कस्मात्फलं तस्य च किं भवेत् कार्पासो दी-
यते कस्मात्किं किं तस्य फलं भवेत् ५ गवादि दीयते कस्माद्विधिना केन केशव दानमात्रस्य कं कुत्र
कर्तव्यं चतुरेश्वर ६ लोहदानं किमर्थं स्याद्भदानं कुतश्चरेत् कुतस्तेस्मरणं कुर्यान्मृतुकाले विशेष-
तः ७ नानुरंदीपयंतो येनेषां किंच फलं भवेत् भूम्न तस्य फलं किं स्याद्दानारस्तस्य केन था ८ नवपूजा च
रेन्मतर्मी विज्ञापन्नानुकीदृशाम् कुतश्च कीदृशी कुत्स दृघादैतरणी विभो ९ पेदग्धा पेह्यदग्धाश्च
प्राणिनो गतदेहकाः ब्रह्महा चात्मघाती च तोपी विश्वासघातकः वेदं पश्च पठेच्छूद्रः कपिलायाः प-
यः पिवेत् १० गच्छेत्पादस्थवा शूद्रो विप्रस्य ब्राह्मणीस्त्रियं ११ ब्राह्मणं पकार पत्नार्यं शूद्रोपश्च सर्वविभे कं ८
धारये द्रुमसूत्रं वा तेषां का च गतिर्भवेत् १२ गुप्तदानं कुतः कुर्म[illegible]र्या दुमिदानं तथा कुतः दीपदा-
नं कुतः कुर्यान्मासे कस्मिंश्च केशव १३ स्याने कस्मिन्न कुर्वीत कार्यः कोत्र विधिर्विभो शय्या
दानं कुतः कुर्याद्दन्मदेहविशोल्कथम् १४ छिद्रं तन्नैव पश्यामि येन जीवः प्रगच्छति पापिनां के-
न मार्गेण धर्मिणां केन वाच्युत १५ कुत्र गच्छंति भूतानि पृथिव्यापश्च केशव कुत्र गच्छंति
तेजश्च वायुश्चाकाशमेव च १६ प्राणादपश्च पंच चैते कुत्र गच्छंति वायवः कुत्र मोहाद २५

लिप्तभूम्यां ततः कृत्वा स्वर्णरत्नं मुखे विनिक्षिपेत् विष्णोः पादोदकं दद्यात् शालिग्रामस्वरूपिणः शालिग्रामशिलातोयं यः पिबेद्
मात्रकं स सर्वपापविनिर्मुक्तो वैकुण्ठभुवनं व्रजेत् ततो गंगाजलं दद्यान्महापातकनाशनं सर्वतीर्थकृतस्नानदानपुण्यफलप्रदम्
पतनु सूर्यांशु तत्र गंगापयः सलिलं पिबेत् स सर्वयोनिनिर्मुक्तः प्रयाति सदने हरेः गंगागंगेति यो ब्रूयात् प्राणैः कण्ठगतैरपि मृतो विष्णु
पुरं याति न पुनर्जायते भुवि ।२

क्षेपयंति शरीरे तत्कारा विभो १७ तस्मात्कामो ह्यहंकारः पापपुण्यं मनस्तथा कुत्र यान्ति मृते देहे हा
नानि विविधानि च १८ इति श्रीगरुडपुराणे प्रेतकल्पे प्रश्नैकोनविंशोऽध्यायः १९ श्रीह
रिरुवाच तव सर्वं वदाम्येतद् गुह्यं खलु खगोत्तम यादृशास्ति पते भूमौ तेन गर्भं वसेन्नरः १
पंचरत्नानि वक्त्रे सुप्तेन जीवः प्ररोहति अधः क्षिप्तैस्तिलैर्दर्भैः पृष्ठे गर्भाशये भवेत् २ लि
प्तायां गोमयैर्भूमौ मुक्तो मर्त्यो दहेदघम् भूतादि प्रविशेत् क्षिप्रमलिप्ते चातकं खग ३ सर्वत्र वसु
धा पूता पत्रलेपः कृतो नहि यत्र लेपः कृतस्तत्र पुनर्लेपेन शुध्यति ४ अहं ब्रह्मा च रुद्रश्च
लक्ष्मीर्वह्निर्वसंति यत् मंडले विनतापुत्र तस्मात्कुर्वंति मंडलम् ५ अन्यथा चेन्मृतो जंतुर
न्यां योनिं न गच्छति भ्रमेद्वायुरूपः सन् अब्दार्द्धं चाप्युपान्ततः ६ मम स्वेदसमुत्पन्नास्ति
लाः पूताः पतत्खग भूतादयस्तिलान्दृष्ट्वा विद्रवंति ततो भृशम् ७ तिलाः श्वेतास्तिलाः कृष्णा
स्तिला गोमूत्रसन्निभाः पापं हरंति ते जाता क्षिप्यंते ते न ते भुवि ८ एक एव तिलो दत्तो हे
मद्रोणतिलैः समम् तर्पणेषु च होमेषु दत्तो ह्यक्षयफलो भवेत् ९ दर्भमूले स्थितो ब्रह्मा
दर्भमध्ये ह्यहं खग दर्भाग्रे शंकरं विद्यात् त्रयो देवाः कुशे स्थिताः १० विप्रा मंत्राः कुशा वह्नि

शृणु तार्क्ष्य परं गुह्यं दानानां दानमुत्तमं दत्तेन तेन तुष्यंति भूर्भुवस्वर्गवासिनः ब्रह्माद्याऋषयो देवा धर्मराजसभासदः स्वर्णदाने ॥ न संतुष्टा भवंति वरदायकाः तस्माद्देयं स्वर्णदानं प्रेतोद्धरणहेतवे न याति यमलोके स स्वर्गतिं तातगच्छति चिरं वसेत्ततो लोके ततो राजा भवेदिह रूपवान् धार्मिको वाग्मी श्रीमानतुलविक्रमः ॥

अनादरं कुर्वंति र

प्रे० २६ र्तुलशीच खगेश्वर नैतेनिर्मोल्यतां यांति विनिर्मुक्ताः पुनःपुनः ११ तुलशीब्राह्मणागावो अ
हमेकादशी तथा येचप्रवहणानि स्युर्भवाब्धौ मज्जतां खग १२ अहमेकादशी गीता तुलशी वि
प्रधेनवः असारे खलु संसारे षट्पदी मुक्तिदायिनी १३ क्षिप्यंते करयोर्यस्य दर्भाः पत्नैश्च वे
क्षते पाणि भूमौ स्थितो यस्तु नूनं कृत्वा कुशैः कृतौ १४ भूदेशे गोमये लिप्ते प्रायच्छितं च
रेत्ययः दत्ते दानं द्विजातिभ्यो निःपापः सन् दिवं व्रजेत् १५ लवणस्यारसो दिव्यः सर्वकाम
प्रदो नृणाम् यस्मादन्नरसाः सर्वे नोत्कटा लवणं विना १६ यतो मदेहगतो यातः पितॄणां च
प्रियो यतः दातृणां मानवानां स तस्मात्स्वर्गप्रदो भवेत् १७ आतुराणां यदा प्राणा न यांति
वसुधातले तदेहं लवणं देयं द्वारस्योद्घाटनं दिवः १८ इति श्रीगरुडपुराणे प्रेतकल्पे
प्रसुतरप्रदानो नाम विंशतितमोऽध्यायः २० हरिरुवाच शृणु तार्क्ष्य परं गुह्यं कर्पासं
दानमुत्तमं येन दत्तेन तुष्यंति पाताल वसुधा दिवः १ ब्रह्माद्या ऋषयो हं च शंकराद्या गणा
तथा इंद्राद्या देवता दत्ते कर्पासे मत्सु मा प्रभुः २ कर्पासं दत्ते यः सः रुद्रलोके वसेच्चिरम् त
तो राजा भवेद्भूमौ ततः स्वर्गं च गच्छति ३ विप्राय दीयते धेनुरन्यस्मै न कदाचन संकल्प २६

विप्रवर्याय दद्याद्भूमिं तिलांश्च गाम् ४ योऽपवर्गाय च स्त्रीभ्यो दानं दद्यादकल्मिकम् गृहणे चातुर
त्वे च दद्याद्दानं विशेषतः ५ दद्यान्न तस्य यद्दानं तत्कालमुपतिष्ठति स्वर्गे यज्जीवने दानमहानु
उपतिष्ठति ६ अस्वस्थायां च दशायां तु करणैः शिथिलायते तिलयुग्गर्भसंसारे दानं बहु
फलप्रदम् ७ लोहदानैर्यमस्तुष्येद्धमदानैरहं खग लवणं दीयते तेन न भयं जायते यमात् ८
कर्पासस्य प्रदानेन दूतेभ्यो न भयं भवेत् तार्यते च नरस्तोर्ध्वं त्रिविधादपि पातकात् ९ मम स्म
रणमात्रेण प्राप्यते परमां गतिं आतुरं दापये दानं पुत्रस्तेन प्रशस्यते १० मृतिकाले सुतो यो
यो यद्दानं प्रदापयेत् स सुतः कुलदीप्तस्तया आबुद्धि शिष्यते ११ स्वस्थानाच्चलिते जी
वेऽप्याकुले ननदा खग क्रियते पुत्रतस्तासापि तरं तारयेद्यतः १२ किं दत्तैर्बहुभिर्दानैः पितुरं
ते विधिमाचरेत् अश्वमेधोऽपि यत्तस्याः कलां नार्हति षोडशीं लोहदानं चरेद्यस्तु भूमियुक्तेन पा
प्मना संशाप्नोति सुखं सर्वं यमगेहे न याति च १४ कुठारो मुशलं दंडं खड्गं चक्षुरिका तथा वर्त
ते यमहस्तेषु निग्रहार्थं दुरात्मनां १५ तस्मात्मे लोहदानं च दद्याद्देहविदे बुधः आयुधेऽपि कुठारो
दो चैतन्यं वर्तते यतः १६ ऊरिणः श्यामसूत्राघाः शंडामर्का ग्वडुंवराः शामला श्यामला दूता

तुष्ये पुत्रैर्महदानतः १७ पुत्रापौत्रास्तथा बंधुः स्वैत्राः सुहृदस्त्रियः नानुरूपपेपुर्यैर्ब्रह्मघ्नैस्तैस
मामताः १८ भूमौ मरणमात्रस्य या गतिः स्वर्गतां शृणु मार्गं कथं सुखं प्रेतः प्राप्नोत्यग्न्यादिनां बहु १९
अग्नित्रपं त्रयो वेदास्त्रयो लोकास्त्रयो नराः कालत्रयं त्रिसंध्यं च हेयमग्न्यादिकं खग २० आरभ्य
पादतो यावत्कटिब्रह्मात्र तिष्ठति ग्रीवा यावद्धरिर्नाभेरारभ्य खग तिष्ठति २१ तथा तिष्ठति जंतूनां
मस्तकेषु महेश्वरः एकमूर्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः २२ अहं प्राणः शरीरस्थो भूतग्रामे
चतुर्विधे धर्माधर्मौ हृदे बुद्धिः पूर्वकर्माधिवासितं २३ स्वर्गं च नरकं मोक्षं तेन गच्छंति मा
नवाः विष्णुर्माता पिता विष्णुर्विष्णुः स्वजनबांधवाः २४ जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्त
के गुरुर्विष्णुः सत्यो विष्णुः सर्वं विष्णुमयं जगत् २५ एवं विज्ञाप्य विधिना पूजनं मम कारयेत्
आतुरं कारयित्वा च न्यासमंगेषु पुत्रक २६ अहं तोयमहं भूमिरहं दर्भा अहं तिलाः अहं धेनुर
हं राजा अहं वा पुरहं प्रजाः २७ अहं हेम अहं धान्यमहं क्षौद्रमहं घृतं अहं विद्यामहं देवा अहं
स्वर्गोप्यहं भुवः २८ अहं दाता ह्यहं ग्राही अहं जापी अहं क्रतुः अहं कर्ता अहं हर्ता अहं धर्मो ह्यहं
शिवः एवं ध्येषु मममात्मानं तं चेतुः पुण्यापतत्ततः सर्वावस्थाकृतं पापं पच्चुजं मांतरेष्वपि ३० २७

यन्निशायां कृतं पापं यन्मध्यान्हापरान्हयोः पूर्वान्हे यत्कृतं पापं कर्मणा मनसा गिरा ३१ दानात्स
तीवरे ह्याच कपिला सर्वकामदा उद्धरेदंतकाले गौरस्मात्पापान्नरं ध्रुवम् ३१ इति श्रीगरुडपुरा
णे प्रेतकल्पे प्रेतसुतरत्र दानो नामैकविंशोऽध्यायः २१ श्रीहरिरुवाच येनराः पापसंयुक्तास्तेयां
ति नरकं खग नत्वामन्नादिकं दानमनंतं फलं भवेत् १ पादक्रमप्रमाणं वं स्वर्गे वसति भूमिदः
अंधकारे महाघोरे लोचनावरके खग २ न यांते नैव ते यांति ये दीपं ददते नराः आश्विने कार्त्ति
के मासे चतुर्दश्याम्मते दिने ३ प्रमहं वाप्रदेपः सः मार्गे दुर्गे तमोवृते देपः संवत्सरं दीपः प्रेतस्य
सुखलिप्सया ४ दानाच्चस्यात्प्रकाशो वै ध्रुवं शं दीपतेखग ज्योतिषामपि पूज्यः स्यात्प्राज्ञसुखः स
सुदंसुखः ५ देवागारे द्विजागारे दीपं कुर्वंभ क्तितः पित्रेयाम्यसुखं कुर्याद्दद्भिः संकल्पसुस्थिरम् ६
हे मे श्रीपतिना युक्तं शय्यां दद्याद्द्विजाय सः तेन प्रेतत्वमुक्तः सः मोदते त्रिदशैः सह ७ इदानीं
मुच्यते पक्षिन्नन्यदेहप्रवेशनम् रोमभिश्च नवद्वारैः प्राणवायुर्विनिःसरेत् ८ पापिष्ठानां स्व
पापेन धर्मिणां तालुरंध्रजः पृथिव्यां लीयते पृथ्वी आपः खग पतेऽप्सु च ९ तेजस्तेजसि
लीयेत पवने पवनस्तथा आकाशे खग चाकाशं जीवात्मा परमा[illegible]त्मनि १० मोहत्वसा

पंचभिः

प्रे० २८ हिकं सर्वजीवात्मन्येवलीयते मृत्युः संहारसमयः प्रोच्यते विनतासुत ११ सर्वेषां प्राणिनां जन्मसृ
ष्टिः संप्रोच्यते तथा शरीरं जगतो रूपं निर्मितं स्वेन कर्मणा १२ । इंद्रियैः सकलैर्युक्तं सकलैर्वि
विधैर्युतं प्रविवेश नवं देहं सुकृतैर्दुःकृतैर्युतः १३ गृहे दग्धे यथा गेहं गृहस्थः प्रविवेशन्नवं
शरीरे ते समासीना भवेयुः सर्वधातवः १४ आधिव्याधिर्यो वायुः पुरीषं मूत्र पित्तकम् श्लेष्मम
ज्जा वसा मांस मेदो स्थि स्नायु शुक्रकम् १५ एकस्तंभं स्नायुयुक्तं स्थूणद्वयसमुद्भृतम् मेघावद्धं
नवद्वारं इंद्रियैरंगसंयुतम् १६ रागद्वेषयुतं कामक्रोधयुक्तविषयैर्युतम् लोभजालपरि
छिन्नं मोहवस्त्रेण वेष्टितम् १७ तस्मात्स्कारसंयुक्तं परंपुरुषसंयुतम् ईदृशमघते जंतोः श संस्तकं ६
रीरं यैश्चतुर्विधम् १८ इति श्रीगरुडपुराणे प्रेतकल्पे प्रसुतरप्रहानो नाम द्वाविंशोऽध्यायः २२
विनतासुत उवाच कथमुत्पद्यते जंतोः शरीरमतिचित्रितम् वेष्टितं च नसाजालैः कर्णकोस्यसु
रेश्वर श्रीहरिरुवाच कथयामि परं गोप्यं शरीरोत्पत्तिनिर्णयम् यस्य विज्ञानमात्रेण सर्वज्ञ
त्वं प्रजायते २ वैनतेय शृणुष्व त्वं मेकाग्रकुमानसः ऋतुकाले नरो नारीं त्यजेद्दिन चतुष्टयं ३
यतस्तन्व्रह्महत्यायाः पुरा वज्रनवध्योद्भवाम् वेध्याः शक्रात्समुत्तार्य चतुर्थांशेन दत्तवान् ४ तावन्ना २८

लि०

लोमस्नानेवस्त्रंपावमापंवशेततनो प्रथमेहनिचांडाली द्वितीयेब्रह्मघातिनी ५ तृतीयेरजकीप्रोक्ताच
तुर्थेहनिशुध्यति सप्ताहात्परतो योग्यापितृदेववृते भवेत् ६ सप्ताहमध्येयोगर्भोविशेषोम
लिनस्तनः युग्मासुपुत्राजायंतेपुत्र्योयुग्मासुरात्रिषु ७ पूर्वाःसप्ततुतस्यताःगर्भे युग्मासु
योषिताम् षोडशर्तुनिशाःस्त्रीणांसामान्यादुरितावुधैः ८ चतुर्दशीतुयारात्रिगर्भस्तिष्ठ ।।
ग्प५ ति तत्रैव गुणभाग्निधिःस्ताहिपुत्रोजायेत धार्मिकः ९ सानिशाऋतुकालेयेःसामान्यातेन
लभ्यते अपत्यःसंभवस्तत्रगर्भस्त्वष्टाहमध्यतः १० पंचमेहनिनारीभिःकार्यंमधुरभो
जनम् कटुक्षारंचतस्कंचत्याज्यंभोजनमंडज ११ तासांतास्पर्शितपोवर्ज्यंशीतलंकेवलंचरे
त् नारीक्षेत्रंनरोवप्तालिंगंलांगूलमुच्यते १२ शुक्रंवीर्यरसोऽन्नास्यसेकपथ्यंतयोर्षर्द्धिः
गंधश्रीखंडतांबूलैःसंमसंगःशुभःस्त्रियः १३ वीर्यसेकस्यसमयेयादृक्पुरुषकल्पना स्वभावः४
तादृक्स्वभावसंयुक्तोजंतुर्भवतिकुक्षिगः १४ शुक्रशोणितयोगेनजंतूत्पत्तिःप्रजायते ज
ठरेवर्द्धतेचापितारापतिरिवांवरे १५ चैतन्यंजीवरूपेहिशुक्रेनिमंस्थितंखग यानेका
मध्वचितंचयदेकत्वमवाप्नुयुः १६ तद्गर्भाशयेस्त्रीणांवीर्यद्रवोभवेन्नृणां रक्ताधिक्ये

नरःबीजवपनकर्मा ५ हलं ५

नपुंसकः १

प्रे॰ २८ भवेत्स्त्री शुक्राधिक्ये भवेत्सुतः १७ शुक्रशोणितयोः साम्ये गर्भः षंढो भवेत्खग अहोरा
त्रेण कललं बुद्बुदः पंचभिः दिनैः १८ चतुर्दशे भवेन्मांसं मिश्रधातुसमुद्भवम् विंशाहे स्ना
युनं मांसमेवं गर्भः प्रजायते १९ पंचविंशे दिने पूर्णे बलं पुष्टिश्च जायते. मज्जास्थीनि त्रि
भिः मासैः केशांगुल्यश्चतुर्थके २० कर्णौ च नासिका वक्षो जायेते मासि पंचमे कंधरं
श्रोत्ररंध्रं षष्ठे गुह्याद्यं मासि सप्तमे २१ अंगप्रत्यंगसंपूर्णो गर्भो मासेऽष्टमे भवेत् नवमे मासि
गर्भस्य स्थानं स्यात्पूर्वजन्मनाम् २२ नाड्यां सुषुम्नया पुष्टोऽपीड्या विकली कृतः ऊर्ध्वं पा गर्भकोष्ठम॰
दोऽधो वक्त्रः सूतवातैः सकृष्यते २३ निःसरेद्दशमे मासि स्त्रियां गर्भो शयात्खग जन्मतो वैष्ण
वी माया गतं मोहयति सत्वरम् २४ सुकृताद्युत्तमो भोगी भाग्यवान् सुकुले वसेत् यथा दुः
कृतकृद्दशोनथा हीने प्रजायते २५ दरिद्रो व्याधिमान्मूर्खो दुःखी पातककृद्भवेत् इति श्री
गरुडपुराणे प्रेतकल्पे जंतूत्पत्तिकथनो नाम त्रयोविंशतितमोऽध्यायः २३ गरुड उवाच त्वगादिकं क
थं जंतोर्जायते कृष्ण देहिनाम् देहेषु वर्तते किं किं तन्नद यथातथम् १ श्रीहृषीकेश उवाच पृथिव्या
पश्च तेजश्च वायुश्चाकाश मज्जाऽभिर्भूतैः पिंडितश्च निबद्धस्तोयु बंधनैः २ त्वगास्थि नाडीरो २८

माणिमासंपंचगुणाःभुवः लालामूत्रंचशुक्रंचमज्जारक्तंमपोगुणाः ३ क्षुधालस्यंतृषानिद्राकांति
स्तेजोगुणाःस्वग वल्गनाकुंचरोधे धावनंचप्रसारणम् ४ रागद्वेषौभयंलज्जामोहोवायोगुणाः
दश गांभीर्यंश्रवणंचित्तं धैर्यंशब्दोनभोगुणाः ५ श्रोत्रंत्वक्चक्षुषीजिह्वानासाज्ञानेंद्रिया
णिवै पाणीपादौगुदोपस्थंवाणीकर्मेन्द्रियाणिवै ६ पिंगलेडासुषुम्नाचगांधारीगजजिह्विका
अलंबुषाकुहूःपूषाशंखिनीवपसातथा ७ देहमध्येस्थितानाड्योनाड्यःप्राधान्यतोदश देहे
भवंतिचामुख्याःनाड्यःपंचवायवः ८ नागःकूर्मश्चकृकरोदेवदत्तोधनंजयः प्राणोऽपानः
समानश्चोदानोव्यानोदशानिलाः ९ प्राणवायुर्नयेदन्नंशरीरेसर्वसंधिषु आहारोभुक्तमात्रश्च
प्राणेनक्षिप्यतेद्विधा १० संप्रविश्यगुदेसम्यक्पृथगन्नंपृथक्जलम् ऊर्ध्वमग्नेजलंकृत्वा
तदन्नंचजलोपरि ११ अग्नेश्चाधास्थितःप्राणस्तमग्निंचधमेच्छनैः प्राणेनधम्यमानोग्निः
कुर्याज्जलरसौपृथक् १२ एकादशमलेभ्यश्चकीटदेहेपृथंमतम् कर्णाक्षिनासिकाजिह्वादं
तानाभिनखस्थिताः १३ केशलेदश्चविण्मूत्रश्चैकादशमलाइमे मज्जास्थिशुक्रमांसत्वग्रक्तं
कोशाइमेषट् १४ एभिःषट्कौशिप्रोक्तंशरीरंहिशरीरिणाम् तिस्रःकोटिश्चरोमाणिकोलंर्ध्

मधुना याम सदृशी न कालेन च यस्मीपुत्सान्चित्रगुप्तेन चित्रेण कृतां तेन निषेवितः अग्निष्वात्ताश्च पितरः सोमपाश्च फेनपाश्च ये ऽन्ये यमायो
स्वधि वशिष्ठः पुलहो दक्षः क्रतुरंगिरा जामदग्न्यो भृगुश्चैव पुलस्त्यागस्त्य नारदः एते चान्ये च बहवः पितृराजसभासदः राजानः सूर्यवं
शीयाः सोमवंश्या तथा परे सभायां धर्मराजस्य धर्मज्ञाः पर्युपासते ययाति दिलीपो मांधाता सगरश्च भगीरथः अंबरीषः कुचकंदर्पया

प्रे०३१ ते ५ निर्णयं यममार्गस्य वदामि खगते पुनः येवस्वतपुरं [illegible] याम्यं नैऋत्ये चास्ति सुव्रते दि
सर्वं । वज्रमयं दिव्यमभेद्यं च सुरासुरैः चतुरस्रं चतुर्द्वारं सप्तप्राकारवेष्टितम् ७ योज
नानां सहस्रं वै प्रमाणेन तदुच्यते स्वयं तिष्ठति स्वस्थाने यमदूतैः समावृतः ८ यमस्या
स्ति गृहं तत्र पंचाशद्योजनैर्मितं विंशतिं च खगश्रेष्ठ योजनानि समुच्छ्रितं ९ सर्वर
त्नमयं दिव्यं विद्युज्ज्वालार्कभासुरम् वृतं स्तंभसहस्रैस्तै वैडूर्यमणिमंडितम् १० मुक्ता
मयं गवाक्षं च पताकाशतभूषितं घंटाशतनिनादाढ्यं तोरणानां शतैर्वृतम् ११ एव
मादिभिरन्यैश्च भूषणैर्भूषितं सदा यमस्तत्रासने दिव्ये भूषिते सन्निषीदति १२ दश
योजनविस्तीर्णे नीलजीमूतसन्निभे धर्मज्ञो धर्मशीलश्च धर्मयुक्तः सदा १३ भ
धर्माधर्मविचारः ३ यदः पापयुक्तानां धार्मिकाणां सुखप्रदः मंदमारुतसंयोगे रुत्सवे विविधैर्युतः १४ ॥
व्याख्यानैर्बहुभिर्युक्तं शंखवादित्रनिःस्वनैः पुरमध्ये प्रदेशेस्ति चित्रगुप्तस्य मंदि
नि रम् १५ योजनानां तु विस्तीर्णं पंचविंशति रंजज दशोच्छ्रितं सदा दिव्यं लोहप्राकारवे
ष्टितम् १६ प्रतोलीशतसंचारं पताकाशतशोभितम् दीपिकाशतसंकीर्णं गीतध्वनि

ति नहुष भरत
शांतनु पांडु स
हस्रार्जुन एते
राजर्षयः पु[illegible]
ण्याः कीर्तिवह
श्रुता दक्षा स्व
मेधैर्बहुभिः जा
ताः धर्मसभास
दः सभापास्य
राजस्य धर्मए
प्रवर्तने

३१

तस्याः सभायां सन्तते वैव स्वेन यमपासते ईदृशी च सभा तात धर्मराजमहात्मनः नतो पश्यन्ति ये पापा दक्षिणेन पथा गताः पूर्वमार्ग
स्तत्रैकैः सर्वमार्गतमन्वितः ते न ब्रूलस वे पोर्याति पुण्या राजर्षयो मताः एतेषु द्वितीनश्चान्ये पूर्वद्वारे विशंति च ॥ द्वितीयस्तूत्तरो
मार्गो म[illegible] पश्चिमे तु तः ये मताः धर्मसंग्रामे [illegible] गृहे च तीर्थतो ये मता विधेः विशंति उत्तरे द्वारे

तो पुः पश्चिमे मार्गः रत्नमन्दिरमंडिताः ध्वस्यय धेन्न नरा यान पुष्याप्तपखिनः ता न वैराग्यसंपन्नाः सर्वे मे हितेरतः
व विष्णुभ्रतधराः कर्मब्रह्मसमर्पकाः विशंति पश्चिमद्वारे ॥ यांति धर्मसभां नरे ॥ यमस्तान् आगतान्

निनादितम् १७ चित्रितं चित्रकलशैर्मालापुष्पादिसंयुतं तत्र मुक्तामये दिव्ये आसने परमा
द्भुते १८ निषण्णो गणपस्यायुः प्राणिनां सर्वदा खग नमु घ्नति कर्ता चित्तस्तु कृते दुःकृते त
था १९ येन यद्यत्कृतं कर्म सदसद्वा लिखत्यसौ चित्रगुप्तालयात्प्राच्यां ज्वरस्यास्ति गृहं महत् २०
शूलस्य दक्षिणे भागे लूताविस्फोटकस्य च पश्चिमे कालपाशस्य अजीर्णस्यारुचेस्तथा २१
मध्ये पीठादुत्तरेशे पान्तथार्ध्यं विषूचिका ईशान्यां वै शिरोर्तिश्च आग्नेय्यामस्ति मूर्छना
२२ अतीसारस्य नैरृत्यां वायव्यां दाहसंज्ञकः रोगैरेभिर्वृतो नित्यं चित्रगुप्तः स तिष्ठति २३
धर्मराजगृहस्याग्रे दृष्टा दिशि खगेश्वर पच्यंते पापकर्माणो नरके पुनराधमाः २४ य
मदूतैर्महापाशैर्हन्यमानाश्च मुद्गरैः बध्यंते विविधैः पाशैः पूर्वकर्मार्जितैर्नराः २५ के
चिदायुधधाराभिर्नानापत्रैस्तथा परे छिंद्यंते पापिनः केचित्क्रकचैः काष्ठवद्द्विधा २६
प्रज्वलद्भिस्तथांगारैः परे पाशतोऽभ्यशाम् पूर्वकर्मविपाकेन ध्मायंते लोहपिंडवत् २७ छि
न्नाश्चान्ये धरापृष्ठे विक्षिप्यंते परश्वधैः केचित्कुंडमये पाके केचित्तैलमये खग २८ पीड्यंते यम
दूतैस्ते पापिष्ठा येऽभ्यशेनराः ऋणानि प्रार्थयंते ते दे हि दे हीति नित्यशः २९ यमलोके मया
ते२

दृष्ट्वा स्वागतं
वदते मुहुः स
मुत्थाय नं च कुरु
तेनेयां गच्छ
तिसभ्य तेम
नमः कुर्वंतु भो
सभ्याः एवमे
मेंगलं मिता
ब्रह्मलोकं प्र
यांति ते
सा

द्वोधनं मे भक्ति तं त्वया ३० इति श्रीगरुडपुराणे प्रेतकल्पे यममार्गकथनो नाम पंच
विंशोऽध्यायः २५ गरुड उवाच १ तत्त्वमोपरि दिष्टं हि विधानं चौर्ध्वदेहिकम् अखि
लं मनुष्येण कृतं यत्कृतं तत्त्वया १ किं कुर्यान्मानवो नूनं संपूर्णं ता व्रजेत् रोगी तोर्व
बुद्धीनो वा हरि श्रद्धवर्जितः २ असकः करणे सर्वं नरः पंचत्वमागतः किं कुर्या येन
वैजंतु र्नाप्नोति यमजातनाम् ३ श्रीकृष्ण उवाच शृणु तार्क्ष्य प्रवक्ष्यामि अकृतं यत्कृ
तं भवेत् पुराणं गारुडं तेन श्रोतव्यं मुक्तिमिच्छता ४ तपोदश्याहमध्ये तु श्रोतव्यं प्र
तिवासरं तस्मिन् श्रुते भयं नैव नूनं संपूर्णतां व्रजेत् ५ पीडयंति न तं मार्गे कदाचि
द्यमकिंकराः कृतं पापं विनश्येत उत्तमं लभते गतिं ६ प्रसन्नो हं भवे तार्क्ष्य दद्यामि प्
रमं पदम् श्रुत्वेदं गारुडं भक्त्या चतुर्वर्गफलप्रदम् ७ पूजये वाचकं व्यासं बुद्ध्या मां चै
वपुस्तकं चंदनाक्षतपुष्पैश्च धूपदीपैरनेकशः ८ वस्त्रालंकारद्रव्यैश्च वित्तशा
ठ्यं न कारयेत् देयानि पंचपात्राणि पंचवस्त्राणि चानघ ९ सुवर्णं च यथाश

तस्माद्वाचककाय प्रकल्पयेत् नत्वा प्रदक्षिणीकृत्य संभोज्य च विसर्जयेत् १० नास्तिकाय कृ
तघ्नाय वेदशास्त्रविनिंदके लोभग्रस्ताय मलिने श्रावयेन्नैव गारुडम् ११ इति तेऽभिहितं
तात किमन्यच्छ्रोतुमिर्हसि उत्तमं शतमांसं हि तदर्धं मध्यमं स्मृतम् १२ तदर्द्धं मध्य
मं प्रोक्तं निकृष्टं तदनंतरम् एकतः सर्वदानानि एकतः सकलाः क्रियाः १३ एकतः श्र
वणं पुत्र पितृकल्पस्य नित्यसः यदिच्छेत्परमं स्थानं प्राप्तुं स्यम्त तस्य सा १४ शृणु
याद्गारुडं भक्त्या सर्वकामफलप्रदम् नानाविधानि दानानि दत्तानि मुनि मानवैः १५
श्रवणस्मित कल्पस्य कलां नार्हंति षोडशीम् यथा सर्वे पदार्था हि निर्हिताकापि मंदि
रे १६ विना दीपं न लभेत् तथास्य श्रवणं विना उत्तमं न भेत् स्थानं पदिदं तेश्रुतं न
रैः १७ तस्माद्दत्संपरित्स शृणुयाद्गारुडं मुदा श्रालिनृश्रुते भवेत्सर्वं पूर्णं मुक्तिम
वाप्नुयात् १८ [illegible] नास्तिकाय कृतघ्नाय लोभग्रस्त हठाय च श्रावयेन्नैवमूर्खाय

प्रे० ३३ आशाहीनाय काश्यप १९ सत्यं सत्यं पुनस्तार्क्ष्य वदामि निजं तव मनम् विनास्य श्रवणं प्रेतो न
लभेद्गुत्तमं पदम् २० हरिरुवाच इष्टापूर्तादिकं तार्क्ष्य यममार्गे सुखी भवेत् इष्टापूर्ते
स्मृतो धर्मो गृहस्थानां खगोत्तमः २१ कृते तपः प्रशंसंति त्रेतायां ध्यानमेव च द्वापरे य
ज्ञदानेन दानमेकं कलौ युगे २२ वृक्षाश्च रोपिता येन मार्गे वृक्षविवर्जिते यममार्गे भयं
मार्गे ते संयांति सुखं नतः २३ सुवर्णमणिरत्नादि दानेन स्यात्सुखी भवेत् दातव्यो नैव
विप्रेणाम् तेषु शूद्रे जलांजलिः २४ चिताये न पतेद्विप्रः काष्ठं शूद्रमृतेषु च अनुव्रजे
च्च येषु शूद्रं त्रिरात्रमशुचिर्भवेत् २५ त्रिरात्रे सति संपूर्णे नदीं गच्छेत्समुद्रगाम् प्रा
णायामशतं कृत्वा घृतं प्राश्य विशुध्यति २६ गच्छति क्षत्रियवर्णो वा विप्रो दातुं जलांज
घ लिं कुर्याद्वैश्यस्य त्रिषु शूद्रस्य तु व्यपि २७ अथ योनरयोर्गर्भ पिंवस्त्रपो हहते खग ९ रो४
वमेकां वरो मूल्याद्घाद्दीर्घ जलांजलिं २८ ततस्तां जन्मना वाहानि गोत्रभिर्दत्त धावनम् ३३
[illegible] तार्क्ष्य॥ जलांजलीं तु प दातुं गच्छंति मुनिसत्तमाः २९ तदा तस्मिन्स्मि
न्नेस्थाने यो मार्गे वा गृहे तथा व्यावृत्तिसमये तस्मात्स्थानात्तं तु विसर्जयेत् ३० स्नीसमू

च४ निवृत्तिसमये

होऽग्रतो गच्छेत् पृष्ठतो नरसंचयः कार्य्यं चाचमनं तावत् पाषाणोपरि संस्थितैः ३१ एवा
श्वसर्षपा दूर्वाः पूर्णे पात्रे विलोकयेत् प्राशयेन्निंबपत्राणि स्नेहस्नानं समाचरेत् ३२
गोत्रीतन्नं प्रकुर्वीत ग्रहार्हान्नेन च भक्षयेत् भुंजीत मृण्मये पात्रे स्वजेद्दुग्धासनादि च ३३
गृण्णान्नं न तस्य गृण्णीयात् यमगाथां समुच्चरेत् मलस्नानं प्रकुर्वीत गृहे चैकादशेहनि
३४ प्रथमेहनि द्वितीये च पंचमे नवमे तथा दिने चैकादशे श्राद्धमेतन्नवकमुच्यते
३५ चतुर्णामपि वर्णानां स्नानं स्यात् सूतकांततः विधाये कादशाहं वै पुनः स्नात्वा शुचि
र्भवेत् ३६ यैर्वस्त्रैर्यत्कृतं श्राद्धं तानि सत्काग्रहं विशेत् अन्यगोत्रः सगोत्रो वा नरो
नार्य्य एव वा खग ३७ प्रथमेहनि यः कुर्य्याद्दशाहं स समापयेत् त्रिरात्राशौचकेकुर्यात्
पिंडांस्त्रीन्प्रथमेहनि ३८ चतुरस्तु द्वितीये न्हि त्रतीये त्रीन्नवगाहनि पृथक्शरा
वयोर्दद्यादेकाहं दुग्धमंडज ३९ एकादशे प्रेतस्य पिंडान्दद्यात् समंत्रकान् सिद्धं
च नक्तं हातव्यं पयः कृशरपूपकान् ४० गृहद्वार समीपे वै दक्षिणाभिमुखः श्व

श्वा

रेत् द्वादशप्रतिमास्यानि श्राद्धानि चोनमासिकान् ४१ तृतीयपक्षिकं चोनषाण्मास
स्योनवार्षिकम् प्रतिमास्यानि कार्याणि मृतस्य तिथिषु ध्रुवं ४२ एकादशाहे मासि
कं स्यात् द्वादशोनमासिकम् त्रैपक्षिकं तृतीये स्यात्पक्षे मृततिथिं विना ४३ ऊन
षाण्मासिकं पक्षे द्वादशे स्यान्मृते तिथौ ऊनाब्दिकं चरेद्दूने वर्षे नैके न वा त्रिभिः ४४
पौर्णमास्यां चतुर्थ्यां च नवम्यां च मृतस्य वै ऊनमासोनषाण्मासोनवर्षश्राद्धमेऽज ४५
चतुर्थ्यां च नवम्यां च चतुर्दश्यां क्रमाच्चरेत् अन्नमेकादशाहे यत्प्रेतोद्देशेन पाचितं ४६
चतुष्पथे त्यजेत्तं तु पुनः स्नानं समाचरेत् यस्मिन्दिने मृते जंतुरब्दं वा पर्वतेऽथवा
४७ यदा तदा भवेद्वाहः सूतकं मृतिपूर्वकम् तिलान्नाद्यं तथा नाद्यं सूतकांते ददाति
वै ४८ एकादशाहप्रभृति यावत्संवत्सरं दिनं वैश्वदेवं च संपूज्य पिंडमेकं ददाति
वै ४९ अथ ते सुकृतैरेतैः सर्वधर्मास्तथा खग यथा तारागणाः सर्वे व्रज्यंते रविर ३४
श्मिभिः ५० इति श्रीगरुडपुराणे प्रेतकल्पे इष्टापूर्त्तादिकथनो नाम षड्विंशोऽध्यायः २६॥

प्रकाशंने

तस्य२ वे२

श्रीकृष्ण उवाच शय्यादानं प्रशस्तं यत्तस्मात्तेवच्मि तत्खग अनित्यं जीवितं यस्मात्को
दास्यति मृते ताम् १ तावद्बंधुः पिता तावद्यावज्जीवति मानवः ते नात्मैवात्मनो बंधुरेवं विज्ञा
न्मुहुर्मुहुः २ जीवन्नपि खग श्रेष्ठ स्वहस्तेन ददाति याम् शुभां शय्यां समानीय सारदारु
गडुआ
मयीं दृढां ३ दंतपत्रचितां रम्यां हेमपट्टैरलंकृताम् तूलीगंडूपसंयुक्तां शुभां शीर्षोप नकिपा ४
धानिकां ४ प्रच्छादनपटीयुक्तां गंधधूपादिवासितां स्थापयेत्तत्र मे मूर्त्तिं हैमीं ल
क्ष्म्या समन्वितां ५ घृतपूर्णं च कलशं समीपे स्थापयेद्बुधः विशेषः श्वेत निद्रायै स
निद्राकलशो बुधः ६ तांबूलं कुंकुमं क्षौद्रं कर्पूरागरुचंदनम् तत्पार्श्वे स्थापयेद्दीपं स
प्तधान्यं पदं तथा ७ शयनस्थस्य भवति यावच्चैवोपकारकम् अंगारकरकादर्शं वि पावसामग्री भवति ८
तानं पंचवर्णकम् ८ एवंविधां च तां कृत्वा ब्राह्मणाय प्रनिवेदयेत् सपत्नीकाय सं
जामा
पूज्य स्वर्लोकसुखदायिनी ९ वस्त्रैश्च शोभनैर्मुद्रिकं चोलकं परिधाप्य च कर्णकंठांगु
लीबाहुभूषणैर्बहुभिर्युक्तं १० संप्रदाय ततोऽर्वं च पंचरत्नफलाक्षतैः विप्रं विसर्ज

प्रे० ३५ पेनार्घ्यं क्षमाप्य प्रार्थयेन्मां तथा ११ प्रार्थनमंत्रः यथा कृष्ण त्वदीयास्ति अनंते न्याक्षीर
सागरे शय्या भूपात्त था शय्या मम जन्मनि जन्मनि १२ मृतस्य तु दशाहे तां पक्षिन्ने
दिनेदि३ कादशेहनि विशेषमन्यपक्षे तु कथ्यमानं मया शृणु १३ यत्किंचिदुपयुक्तं स्याज्जी
वितस्तु गेहे पुरा तस्य गात्रे च यल्लग्नं वस्तु वाहनभाजनम् १४ अभीष्टं तस्य यद्या
सीत्तस्पुरः स्थापयेच्च तत् हेमप्रतिमया युक्तो दद्यात्संपूज्य तां द्विज १५ पुरंदरग
हे सर्वे धर्मराजगृहे तथा उपतिष्ठतु स्वर्जंतोः शय्यादानेप्रभावजम् १६ पीड्यं
ते न तं यम्याः पुरुषाः भीषणाः खग नाधर्मेणा न शीतेन वाध्यते स नरः क्वचित्
१७ अपि पापसमायुक्तः स्वर्गे वसति तुल्यहः शय्यां दद्या[illegible]च्छुभां तार्क्ष्य आद्यं बो
ड्शकानि च १८ भर्तुर्या कुरुते नारी तस्याः श्रेयो भवेदिह उपकर्त्री यथा भर्तुर्जी
वंती न तथा मृता १९ जीवंती शोनरे तार्क्ष्य पतिं स्वीयं पतिव्रता स्त्रियस्तु शयनं द
द्याद्भूषणं जनकुंकुमं २० वसनं गात्रलग्नं च विप्राय विनिवेदयेत् नार्या यद्दुप ३५
युक्तं तत्तत्र तल्पे नियोज्य च २१ संपूज्य लोकपालांश्च ग्रहान् देवीं विनायकाम्

ततः शुक्लांबरधरो गृहीतकुसुमांजलिः २२ इमं मंत्रं समुच्चार्य विप्रस्य च पुरस्तथा
मंत्रः हेमप्रतिमया युक्तां सर्वोपस्कर संयुतां २३ सर्वरत्नयुतां ह्येषां तव विप्र निवेदि
ता आत्मैवाहं शिवो गौरी ब्रह्म शक्रः सुरैः सह २४ तस्माच्छय्याप्रदानेन एष आत्मप्र
सीदति आचार्याय प्रदेया सा ब्राह्मणाय कुटुंबिने २५ विप्राय वा गृहस्थाय को दद्यापि
च कीर्त्तयेत् ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् २६ बहुभ्यो नैव दातव्या धे
नुशय्या गृहास्त्रियः भविभक्ता दक्षिणा एता दातारं पातयंति यत् २७ इच्छाच्छय्यां प्रमुदि
श्य शृणु त्वं तस्य यत्फलम् सार्द्धशतं दिव्य वर्षं स्वर्गलोके स पूज्यते २८ यद्दानं च व्य
तीपाते कार्त्तिक्यां त्वयने तथा द्वारकायां च यद्दानं चंद्र सूर्यग्रहे तथा २९ प्रयागे नैमिषे
दानं कुरुक्षेत्रेऽर्बुदे तथा गंगायां यमुनायां च दानं सिंध्वब्धि संगमे ३० शय्यादानं त्वे
ते गेभ्यो दानेभ्यो ह्यधिकं भवेत् ददाति ब्राह्मणेभ्यो यः पितॄणां प्रीणनाय वै ३१ शय्या
दानप्रभावेन सोपीष्टफलभाग्भवेत् यत्रासौ जायते प्राणी भुक्ते तत्र च तत्फलम् ३२

भाविमंगलकरिष्यन् ६८

प्रे० ३६ पुण्यक्षयेक्षितिं प्राप्तो मानुषः सुदरो भवेत् महाधनी च धर्मज्ञः सर्वशास्त्रविशार
दः ३३ ततः स गच्छति स्वर्गं मृतो सौ नरपुंगवः दिव्यं विमानमारुह्य सुरनारीसमावृ
तः ३४ अर्हः स्याद्धव्यकव्येषु मोदते पितृभिः सह ः इति श्रीगरुडपुराणे प्रेतकल्पे श
य्यादाननिरूपणो नाम सप्तविंशोऽध्यायः २७ श्रीहरिरुवाच आद्धानि नोपतिष्ठंति स
पिंडीकरणं विना सपिंडनं प्रकुर्याद्वर्षमध्ये ततः खग १ विधाय षोडशश्राद्धाणि
आद्धानि प्रथमं खग वृद्धिप्राप्यागतः कुर्याच्छूद्रस्य द्वादशेऽहि तत् २ पक्षिं द्रुतानि
ना कार्यं द्वादशेऽहे सपिंडनम् यावत्तन्न कृतं तावन्न यजेताग्निभिः सह ३ द्वादशा
हे ततः कार्यं साग्निकेन सपिंडनं श्राद्धंसोनप्रमादेन शूद्रेण वर्जितोऽभवेद्यदि असा
पिंडस्याग्निमान्पुत्रः पितृयज्ञं न चाचरेत् ४ अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं वर्षम
ध्ये न कुर्वीत सपिंडीकरणं विना ५ अनेकाः स्युः स्त्रियः तासां पुत्रः कुर्यात्सपिंडनम् ब्राह्मणे ३६
नेन प्रमादेन शूद्राज्जाता भवेद्यदि ६ एकोद्दिष्टं पितुः कार्यं शूद्रां ते नैव योजयेत् अन्येद
र्शयेजाताः सुतावर्णेचतुष्टये ७ तेच तासु निपोक्तव्याः सपिंडीकरणे खग अन्वं

मलसुससुसपिंडीकरणे प्रेरणीयाः १

प्रत: स्नात्वा मृतस्थाने गोमयेनोपलेपिते शास्त्रोक्तेन विधानेन सपिंडीं कारयेत् मः पाद्यार्घ्याचमनीयाद्यैर्विश्वे

वांश्च पूजयेत् कुपत्रे विकरं दत्वा पुनश्चाप उपस्पृशेत् दद्यात् पितामहादीनां त्रीन् पिंडांश्च यथाक्रमं देवरपुत्रः ४

एकादिकं चापि पश्चात् ...द्धं वृद्धिहेतुकं ८ सपिंडीकरणं पश्चान्मातुः कुर्यात् पितुः पृथक्

पितामह्यादिभिः मातुः पितुः सह पितामहैः ९ सपिंडीकरणं कुर्यादिति तार्क्ष्य मतं मम

अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनं १० श्वश्र्वादिभिस्तु सा भिः सार्द्धमेवं सा सहगामिनी भ

वेत् या सा पतिसुतैर्नृनं स्वस्ता सां तार्क्ष्य सपिंडनं ११ कुरुते विनता पुत्र देवरो ज्येष्ठ देवरोऽथ रो ४

वा पितुः पुत्र विहीनायाः स्वगोत्ररहिताश्च या: १२ अन्यगोत्रेण नाम्ना यः संयोज्या भ्रात

भिः सह विधवादिना न यातं चेत्स्वके काले सपिंडनम् १३ नवकैः षोडशैः श्राद्धैः सहैकाहे च

सपिंडनं रेतु तत् दग्धे देहे प्रकर्तव्यमदग्धे सति काश्यपे १४ दर्भपुत्तलकं कृत्वा दग्ध्वा गंधैव तच्च

रेत् पितुः पुत्रेण तत्कार्यं न कुर्वीत पिता सुते १५ बहवोपि हि पुत्रास्युः तथापि विनतासुत॥

नवश्राद्धं सपिंडत्वं तथाश्राद्धानि षोडश १६ एकेनैतानि कार्याणि प्रविभक्तधनेष्वपि॥

प्रविभक्तैः पृथक्कार्या क्रिया सांवत्सरादिका १७ एकेकेन प्रकर्तव्या पुत्रेणार्थे स्वकैः स्वकैः

मृते पितर्यब्दमध्ये गृहणं चेत्स्वगोत्तम १८ प्रावर्णेन सुतैः कार्यं श्राद्धं नांदीमुखं न च॥ नवधा

तीर्थश्राद्धं गयाश्राद्धं श्राद्धमन्यच्च पैतृकं १९ वर्षमध्ये न कुर्वीत मृते पितरि चाण्डज

वसुरुद्रार्करूपाणां चतुर्थं मृतकस्य च चंदनैस्तुलसीपत्रैः धूपैर्दीपैः भोजनैः छत्रवासैः एवं स्त्रैश्च दक्षिणाभिश्च पूजये

त् प्रेतपिंडं त्रिधा कृत्वा एवर्णीस्य सेलाकया पिण्डानामसपिंडेषु मेलयेत्पृथक् पृथक्॥१

पल्मके पितृनाशं तडागे चेतिस्मृतम् १
मठे फलं गजच्छायां शिरःपाण्यादिषु कृत सर्वं तत्योग भोग हेतु कृत्स्नलेति विचारितम् १
मात्रीदि: कार्तिकशुक्लनवम्यां कृतिषु गोत्सव तिः इत्यादि युगादि

प्रे० ३७ पद्मके च गजच्छायायां पंनाहे च युगादिषु २० पितृपिंडान दातव्यं सपिंडीकरणं विना ॥
यज्ञेनाथाप्य यदुक्तं देवादिभ्यश्च तथा २१ दत्तं मत्स्य च मध्ये पुमितृभ्यः स्तात्स्थं तथा
पितृदेवमनुष्याणां यज्ञनाथो विभुर्यतः २२ यज्ञनाथाय यद्दत्तं तद्दत्तं सर्वदेहिनां देवा
नां पितरो देवाः पितॄणामयं यस्तथा २३ आषीणां पितरो देवास्ततः पुत्रो यजेत्पितॄ
न् वैनतेय उवाच प्रयागादिमृतौ मुक्तिर्येन सत्यं पुरी मतः २४ तेषां सपिंडनं कृष्ण क
थं कार्यं च मानवैः श्रीकृष्ण उवाच साधु पृष्टं त्वया तार्क्ष्य लोकोद्धारणहेतवे २५ तदहं
